# काव्यानुशासन-साहित्यदर्पणग्रन्थयोः गुणविचारः।

# Analysis of Guṇa in Kavyānushāsana and Sāhityadarpaṇa.

Pushpendu Mondal
*Research Scholar Ph.D. Department of Sanskrit, Bankura University.*

**_प्रबन्धसारः (Abstract)_ काव्यानुशासनम् इति ग्रन्थम् आचार्यहेमचन्द्रः विरचितवान्। अस्य काव्यानुशासनग्रन्थः काव्यशास्त्रस्य उपरि एकः महत्वपूर्णग्रन्थ इति। काव्यानुशासनग्रन्थे अष्टाध्यायाः सन्ति। अध्यायेषु हेमचन्द्रेण क्रमानुसारेण काव्यशास्त्रस्य भूमिकारसविवेचनगुणविवेचनशब्दालंकारविवेचनार्थालंकारविवेचननायकनायिकागुण विवेचनदृश्यश्रव्यकाव्यस्वरूपप्रभृतिविषयेषु आलोचना दृश्यते। विश्वनाथकविराजविरचितः साहित्यदर्पण इति अलंकारशास्त्रस्य प्रामाणिकग्रन्थः। यद्यपि काव्यप्रकाशकाव्यानुशासनादिग्रन्थेभ्यः ग्रन्थकारेण बहुतथ्यं संगृहीतं तथापि तेन साहित्यदर्पणस्य स्वीयं वैशिष्ट्यं न क्षुण्णम्। साहित्यदर्पणग्रन्थे दशपरिच्छेदाः सन्ति परिच्छेदेषु विश्वनाथकविराजेन क्रमानुसारेण नीत्वा काव्यस्वरूपवाक्यस्वरूपरसादिनिरूपणकाव्यभेददृश्यश्रव्यकाव्यदोषगुणरीतिविवेचना लंकारनिरूपणप्रभूतिविषयेषु आलोचना कृता। यथा हेमचन्द्रः तथा विश्वनाथः अपि उभौ एव काव्यप्रयोजनरसदोषगुणरीत्यालंकारनायकनायिकागुणविचारदृश्यश्रव्यकाव्यस्वरूपाणि तयोः ग्रन्थे मतप्रकाशं कृतवन्तौ। समविषयं आश्रित्य यद्यपि आलोचनां वर्तते, तथापि ग्रन्थद्वयं पठित्वा उभययोः मतयोः मध्ये बहुसादृश्यानि बहुवैसादृश्यानि च प्राप्तानि। तस्मात् मम मनसि एवं जिज्ञासा आगता यत् समविषयालोचनायाः परमपि उभययोः मतयोः मध्ये भिन्नता किमर्थम्? कस्य च मतं श्रेयः अस्याः जिज्ञासायाः निवारणार्थम्" काव्यानुशासनसाहित्यदर्पणग्रन्थयोः गुणविचारः" इति नामधेयम् इत्याख्यं शोधकार्यं कर्तुमिष्यते।**

*कुञ्चिकाशब्दाः (Key Words)* गुणनिरूपणम्, रसाभासः, उत्कर्षहेतवः, शौर्यादयः, दोषाः।

## <u>भूमिका</u> (INTRODUCTION)

भारतीयकाव्यशास्त्रस्य उद्भवविकासयोः एका सुदीर्घा परम्परा अस्ति। महर्षिभरताद् नैकेषाम् आलङ्कारिकाणाम् नामानि श्रूयन्ते। तेषु आचार्यहेमचन्द्रस्य विश्वनाथकविराजस्य नाम सविशेषम् उल्लेखयोग्यम्। आचार्यहेमचन्द्रः एकः जैनाचार्यः आसीत्। ड.वेलभालकारस्य मते 1145 विक्रमाब्दे आचार्यहेमचन्द्रः जन्मग्रहणं कृतवान् आमेदावादजनपदस्य अन्तर्भूक्ते धन्धुक इति स्थाने। तस्य समयकालः आसीत् ख्रीष्टियद्वादशशताब्दी। विदुषां मते विश्वनाथः कविराजः ओडिशानिवासी आसीत्। विश्वनाथकविराजः चतुर्दशशतकस्य आलंकारिकः आसीत्। अर्थात् समयकालं विचार्य्य एतत् वक्तुं शक्यते यत् हेमचन्द्रस्य उत्तरवर्ती कविः विश्वनाथकविराज इति।

काव्यानुशासनम् इति ग्रन्थम् आचार्यहेमचन्द्रः विरचितवान्।असौ काव्यानुशासनग्रन्थः काव्यशास्त्रस्य उपरि एकः महत्वपूर्णग्रन्थ इति। काव्यानुशासनग्रन्थे अष्टाध्यायाः सन्ति। अध्यायेषु हेमचन्द्रेण क्रमानुसारेण काव्यशास्त्रस्य भूमिकारसविवेचन-गुणविवेचन-शब्दालंकारविवेचनार्थालंकारविवेचन-नायकनायिकागुणविवेचन-दृश्यश्रव्यकाव्यस्वरूपप्रभृति-विषयेषु आलोचना दृश्यते। विश्वनाथकविराजविरचितः साहित्यदर्पण इति अलंकारशास्त्रस्य प्रामाणिकग्रन्थः। यद्यपि काव्यप्रकाशकाव्यानुशासनादिग्रन्थेभ्यः ग्रन्थकारेण बहुतथ्यं संगृहीतं तथापि तेन साहित्यदर्पणस्य स्वीयं वैशिष्ट्यं न क्षुण्णम्। साहित्यदर्पणग्रन्थे दशपरिच्छेदाः सन्ति। परिच्छेदेषु विश्वनाथकविराजेन क्रमानुसारेण काव्यस्वरूपवाक्यस्वरूपरसादिनिरूपणकाव्यभेददृश्यश्रव्यकाव्यदोषगुणरीतिविवेचनालं कारनिरूपणप्रभृतिविषयेषु आलोचना कृता। यथा हेमचन्द्रः तथा विश्वनाथः अपि उभौ एव काव्यप्रयोजनरसदोषगुणरीत्यालंकारनायकनायिकागुणविचारदृश्यश्रव्यकाव्यस्वरूपाणि नीत्वा तयोः ग्रन्थे मतप्रकाशं कृतवन्तौ। समविषयं आश्रित्य यद्यपि आलोचनां वर्तते , तथापि ग्रन्थद्वयं पठित्वा उभययोः मतयोः मध्ये बहुसादृश्यानि बहुवैसादृश्यानि च प्राप्तानि। तस्मात् मम मनसि एवं जिज्ञासा आगता यत् समविषयालोचनायाः परमपि उभययोः मतयोः मध्ये भिन्नता किमर्थम् ? कस्य च मतं श्रेयः अस्याः जिज्ञासायाः निवारणार्थम् 'काव्यानुशासनसाहित्यदर्पणग्रन्थयोः गुणविचारः'- इति नामधेयम् इत्याख्यं शोधकार्यं कर्तुमिष्यते।

इतः पूर्वं न केनापि काव्यानुशासनसाहित्यदर्पणगर्न्थयोः तुलनामूलकाध्यायनं कृतम्। अतः अनयोः ग्रन्थयोः तुलनामूलकमालोचनं सर्वथा मे नूतनं कार्यम्। पूर्ववर्तीशोधकर्त्री निगमपल्लवी "साहित्यदर्पण का आलोचनात्मक एवं तुलनात्मक अनुशीलन्" इत्यस्य विषयस्य उपरि 2002 ख्रीष्टाब्दे , छत्रपतिशाउजि महाराज विश्वविद्यालयतः इमं शोधप्रबन्धं विरचितवती। अपि च शास्त्रीछागन्लालः "आचार्य हेमचन्द्रकाव्यानुशासनाञ्च समीक्षात्मकमध्ययनम्" इत्यस्य विषयस्य उपरि श्रीलालबाहादुरशास्त्रीविद्यापीठ इति स्थानतः इमं शोधप्रबन्धं विरचितवान्। अस्य शोधप्रबन्धस्य उपरि यदि वयं अतिसूक्ष्मभावेन विचारं कुर्मः तर्हि एवं पश्यामः यत् तत्तत्ग्रन्थेषु अर्थात् तत्तच्छोधप्रबन्धेषु उभयमतामततुलनात्मकविचारो न भवति। एवं कार्यम् अभवत् यत् कस्मिंश्चित् विषयोपरि विशिष्ट्याध्यायनात्मकमालोचना आसीत् , परन्तु अनयोः ग्रन्थयोः मध्ये कानि सादृश्यानि कानि वैसादृश्यानि सन्ति किं मतं युक्तियुक्तं किं मतं ग्राह्यम् अग्राह्यं वा अस्मिन् विषये चर्चा अधुना अपि मम दृष्टिगोचरं न भवति।

## <u>गुणनिरूपणम्</u> (ANALYSIS OF GUṆA)

गुणस्वरूपविषये काव्यशास्त्रकारेषु बहुधा मतभेदः परिलक्ष्यते केचित् विद्वांसः गुणं शब्दार्थस्य धर्मरूपेण स्वीकुर्वन्ति। अपरे विद्वांसः काव्ये गुणस्य स्थायित्वं प्रदर्शितवन्तः। तत्र आचार्यहेमचन्द्रस्य मते गुणस्य सामान्यलक्षणम् – रसस्योत्कर्षापकर्षाहेतु गुणदोषौ

भक्त्या शब्दार्थयोः **इति**।[1] आचार्यहेमचन्द्रस्य नये रसस्य उत्कर्षसाधने यो भवति हेतुः स गुण इति , किञ्च रसस्य अपकर्षसाधकहेतुः दोषः। हेमचन्द्रमते गुणः दोषश्च साक्षात् रसस्य धर्मः तथा परोक्षतया शब्दार्थयोरपि धर्मः। हेमचन्द्रेण वृत्तौ उल्लिखितम् **- रसो** वक्ष्यमाणस्वरूपस्तस्योत्कर्षहेतवो गुणाः उत्कर्षहेतवस्तु दोषाः। ते च रसस्यैव धर्मा उपचारेण **तु तदुपकारिणोः शब्दार्थयोरुच्यन्ते**।[2]

आचार्यविश्वनाथस्य मते गुणस्य सामान्यलक्षणम् – उत्कर्षहेतवः प्रोक्ता गुणालंकार-रीतयःइति।[3]

रीतिगुणालंकाराः काव्यस्य उत्कर्षहेतवः इति आचार्यविश्वनाथनयः।

रसस्याङ्गित्वमाप्तस्य धर्माः शौर्यादयो यथा गुणाः।। [4] इति शौर्यप्रभृतिवद् अङ्गित्वप्राप्तरसस्य स्वरूपप्रकाशकमाधुर्यप्रभृतिधर्मसमूहाः हि गुणाः। इत्थम् उभयोः आचार्ययोः मतं समीक्ष्यते चेत् दृश्यते – एषां शब्दगुणत्वं च गुणवृत्त्योच्यते बुधैः।[5] रसयोजनायां वर्णयोजनायाः महत्त्वं स्वीकृत्य रसे शब्दार्थे च व्यङ्गब्यञ्जकसम्बन्धविद्यमानार्थम् आचार्यविश्वनाथैः गुणे रसधर्मत्वं शब्दार्थधर्मत्वं च यथा स्वीकृतं तथा रसाभासधर्मत्वमपि स्वीकृतम्--सम्भोगादिशब्दा उपलक्षाणानि। तेन सम्भोगाभासादिष्वप्येतस्य स्थितिर्ज्ञेया। [6] अर्थात् सम्भोगादि शब्दसमूहोपलक्षणम्। सम्भोगाभासयोः माधुर्यगुणः अस्ति इति मन्यते। परन्तु मम्मटम् आदर्शभूतम् इति मत्वा आचार्यहेमचन्द्रैः तस्य काव्यानुशासनग्रन्थे यद्यपि गुणस्य रसधर्मत्वं शब्दार्थधर्मत्वं च स्वीकृतं तथापि गुणस्य रसाभासधर्मत्वं नाङ्गीकृतम्।

ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः।

उत्कषहेतवस्ते स्युरचलस्थितयोगुणाः इति।।[7]

इत्थम् उभयाचार्ययोः मतवैलक्षण्यं तु सुलभमेव। एतयोः कतरत् मतं किमर्थं च युक्तम् इति सयुक्ति भाविनि काले निरूपयिष्यते।

रसाभासस्य उदाहरणं हि –

मधु द्विरेफ कुसुमैकपात्रे
पपौ प्रियां स्वामनुवर्त्तमानः |
शृङ्गेन च स्पर्श-निमीलिताक्षी
मृगीमकण्डुयत् कृष्णसारः || [8]

अत्र सम्भोगशृङ्गाररसः तिर्यकप्राणिगतार्थं रसाभासस्य आभासो भवति | अस्मिन उदाहरणे स्पष्टरूपण वोध्यते यत् गुणस्य शव्दार्थधर्मत्वं रसधर्मत्वं च विद्यमानार्थं गुणे रसाभासधर्मत्वं विद्यते| अतः आचार्यहेमचन्द्रस्य गुणनिरूपणात् तदुत्तरवर्तीनः विश्वनाथकविराजस्य गुणनिरूपणम् अतीव युक्तिमत्।

## सन्दर्भग्रन्थसूची (BIBLIOGRAPHY)


[1] सिंह, सत्यव्रतः . *साहित्यदर्पणः* . वाराणसी : चौखाम्वाविद्याभवनम् , ११८२ .

[2] द्विवेदी , दुर्गाप्रसादः . *साहित्यदर्पणः* . वाराणसी : चौखाम्वाविद्याभवनम् . १९९८ .

[3] शर्मा , रामानन्दः . *काव्यानुशासनम्* . वाराणसी . कृष्णदास-अकादमी . १९३४ .

[4] शर्मा , शिवदत्तः . *काव्यानुशासनम्* . बम्बइ . निर्णयसागरप्रेस , १९३४

[5] शास्त्री, श्रीनिवासः . *काव्यप्रकाशः* . उत्तरप्रदेशः : साहित्यभाण्डारः , २००६.

[6] कौण्डिन्पायनः , शिवराजः . *काव्यप्रकाशः* . वाराणसी : मोतिलालवानारसीदासः ,

[7] Kane, P.V. *Sahityadarpana*. Delhi: Motilal Banarasidas, 1975.

[8] Kane, F.V. *History of Sanskrit poetics*. Delhi: Motilal Banarasidas, 1971.

[9] Kane, P.V. *Sahityadarpana with History of Sanskrit Poetics*. Bombay: Nirmaya Sagar Press, 1923.

[10] Johan, Kala Nath. *Figurative Poetry in Sanskrit Literature.* Delhi: Motilal Banarasidas, 1975.

[11] Vardhana, Vijay. *Outline of Sanskrit Poetics*. Uttar Pradesh: Chowkhamba Publication. 1975


[1] काव्यानुशासनम् 1/12
[2] काव्यानुशासनवृत्तिः 1/12
[3] साहित्यदर्पणवृत्तिः1/5
[4] साहित्यदर्पणवृत्तिः 8/1
[5] साहित्यदर्पणवृत्तिः 8/8
[6] साहित्यदर्पणवृत्तिः 8/2
[7] काव्यप्रकाशः 8/66
[8] कुमारसम्भवम् 3/36